# Kushapamarjana Stotram

# કુશાપમાર્જનસ્તોત્રમ્

## Document Information

Text title : Kushapamarjana Stotram

File name : kushApamArjanastotram.itx

Category : vishhnu, vishnu, agnipurANa, apAmArjana, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : agnipurANa | adhyAya 31/2-46||

Latest update : October 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2024

*sanskritdocuments.org*

# કુશાપમાર્જનસ્તોત્રમ્

માર્જનવિધાનં

અગ્નિરુવાચ ।

રક્ષાં સ્વસ્ય પરેષાઞ્ચ વક્ષ્યે તાં માર્જનાહ્વયામ્ ।
યયા વિમુચ્યતે દુઃખૈઃ સુખઞ્ચ પ્રાપ્નુયાન્નરઃ ॥ ૧॥

ૐ નમઃ પરમાર્થાય પુરુષાય મહાત્મને ।
અરૂપબહુરૂપાય વ્યાપિને પરમાત્મને ॥ ૨॥

નિષ્કલ્મષાય શુદ્ધાય ધ્યાનયોગરતાય ચ ।
નમસ્કૃત્ય પ્રવક્ષ્યામિ યત્તત્સિધ્યતુ મે વચઃ ॥ ૩॥

વરાહાય નૃસિંહાય વામનાય મહામુને ।
નમસ્કૃત્ય પ્રક્ષ્યામિ યત્તત્સિધ્યતુ મે વચઃ ॥ ૪॥

ત્રિવિક્રમાય રામાય વૈકુણ્ઠાય નરાય ચ ।
નમસ્કૃત્ય પ્રવક્ષ્યામિ યત્તત્સિધ્યતુ મે વચઃ ॥ ૫॥

વરાહ નરસિંહેશ વામનેશ ત્રિવિક્રમ ।
હયગ્રીવેશ સર્વેશ હૃષીકેશ હરાશુભમ્ ॥ ૬॥

અપરાજિતચક્રાદ્યૈશ્ચતુર્ભિઃ પરમાયુધૈઃ ।
અખણ્ડિતાનુભાવૈસ્ત્વં સર્વદુષ્ટહરો ભવ ॥ ૭॥

હરામુકસ્ય દુરિતં સર્વઞ્ચ કુશલં કુરુ ।
મૃત્યુબન્ધાર્ત્તિભયદં દુરિતસ્ય ચ યત્ ફલમ્ ॥ ૮॥

પરાભિધ્યાનસહિતૈઃ પ્રયુક્તઞ્ચાભિચારકામ્ ।
ગરસ્પર્શમહારોગપ્રયોગં જરયા જર ॥ ૯॥

ૐ નમો વાસુદેવાય નમઃ કૃષ્ણાય ખડ્ગિને ।
નમઃ પુષ્કરનેત્રાય કેશવાયાદિચક્રિણે ॥ ૧૦॥

નમઃ કમલકિઞ્ચલ્કપીતનિર્મ્મલવાસસે ।
મહાહરરિપુસ્કન્ધસૃષ્ટચક્રાય ચક્રિણે ॥ ૧૧॥

દંષ્ટ્રોદ્ધૃતક્ષિતિભૃતે ત્રયીમૂર્ત્તિમતે નમઃ ।
મહાયજ્ઞવરાહાય શેષભોગાઙ્કશાયિને ॥ ૧૨॥

તપ્તહાટકકેશાગ્ર(ન્ત)જ્વલત્પાવકલોચન ।
વજ્રાધિકનખસ્પર્શ દિવ્યસિંહ નમોઽસ્તુ તે ॥ ૧૩॥

કાશ્યપાયાતિહ્રસ્વાય ઋગ્યજુઃસામભૂષિત ।
તુભ્યં વામનરૂપાયાઽક્રમતે ગાં નમો નમઃ ॥ ૧૪॥

વરાહાશેષદુષ્ટાનિ સર્વપાપફલાનિ વૈ ।
મર્દ્દ મર્દ્દ મહાદંષ્ટ્ર મર્દ મર્દ ચ યત્ફલમ્ ॥ ૧૫॥

નરસિંહ કરાલાસ્ય દન્તપ્રાન્તાનલોજ્જ્વલ ।
ભઞ્જ ભઞ્ચ નિનાદેન દુષ્ટાન્પશ્યાર્તિનાશન ॥ ૧૬॥

ઋગ્યજુઃસામગર્ભાભિર્વાગ્ભિર્વામનરૂપધૃક્ ।
પ્રશમં સર્વદુઃખાનિ નયત્વસ્ય જનાર્દ્દનઃ ॥ ૧૭॥

ઐકાહિકં દ્વ્યાહિકઞ્ચ તથા ત્રિદિવસં જ્વરમ્ ।
ચાતુર્થકં તથાત્યુગ્રં તથૈવ સતતજ્વરમ્ ॥ ૧૮॥

દોષોત્થં સન્નિપાતોત્થં તથૈવાગન્તુકં જ્વરમ્ ।
શમં નયાશુ ગોવિન્દ છિન્ધિ છિન્ધ્યસ્ય વેદનામ્ ॥ ૧૯॥

નેત્રદુઃખં શિરોદુઃખં દુઃખઞ્ચોદરસમ્ભવમ્ ।
અન્તઃ શ્વાસમતિશ્વાસં પરિતાપં સવેપથુમ્ ॥ ૨૦॥

ગુદઘ્રાણાઙ્ઘ્રિરોગાંશ્ચ કુષ્ઠરોગાંસ્તથા ક્ષયમ્ ।
કામલાદીંસ્તથા રોગાન્ પ્રમેહાંશ્ચાતિદારુણાન્ ॥ ૨૧॥

ભગન્દરાતિસારાંશ્ચ મુખરોગાઁશ્ચ વલ્ગુલીમ્ ।
અશ્મરીં મૂત્રકૃચ્છ્રાંશ્ચ રોગાનન્યાંશ્ચ દારુણાન્ ॥ ૨૨॥

યે વાતપ્રભવા રોગા યે ચ પિત્તસમુદ્ભવાઃ ।
કફોદ્ભવાશ્ચ યે કેચિત્ યે ચાન્યે સાન્નિપાતિકાઃ ॥ ૨૩॥

આગન્તુકાશ્ચ યે રોગા લૂતા વિસ્ફોટકાદયઃ ।
તે સર્વે પ્રશમં યાન્તુ વાસુદેવાપમાર્જિતાઃ ॥ ૨૪॥

વિલયં યાન્તુ તે સર્વે વિષ્ણોરુચ્ચારણેન ચ ।
ક્ષયં ગચ્છન્તુ ચાશેષાસ્તે ચાત્રાભિહતા હરેઃ ॥ ૨૫॥

અચ્યુતાનન્તગોવિન્દનામોચ્ચારણભેષિજાત્ ।
નશ્યન્તુ સકલા રોગાઃ સત્યં સ્ત્યં વદામ્યહમ્ ॥ ૨૬॥

સ્થાવરં જઙ્ગમં વાપિ કૃત્રિમઞ્ચાપિ યદ્વિષમ્ ।
દન્તોદ્ભવં નખભવમાકાશપ્રભવં વિષમ્ ॥ ૨૭॥

લૂતાદિપ્રભવં યચ્ચ વિષમન્યત્તુ દુઃખદમ્ ।
શમં નયતુ તત્સર્વં કીર્ત્તિતોઽસ્ય જનાર્દ્દનઃ ॥ ૨૮॥

ગ્રહાન્ પ્રેતગ્રહાંશ્ચાપિ તથા વૈ ડાકિનીગ્રહાન્ ।
વેતાલાંશ્ચ પિશાચાંશ્ચ ગન્ધર્વાન્ યક્ષરાક્ષસાન્ ॥ ૨૯॥

શકુનીપૂતનાદ્યાંશ્ચ તથા વૈનાયકાન્ ગ્રહાન્ ।
મુખમણ્ડીં તથા ક્રૂરાં રેવતીં વૃદ્ધરેવતીમ્ ॥ ૩૦॥

વૃદ્ધકાખ્યાન્ ગ્રહાંશ્ચોગ્રાંસ્તથા માતૃગ્રહાનપિ ।
બાલસ્ય વિષ્ણોશ્ચરિતં હન્તુ બાલગ્રહાનિમાન્ ॥ ૩૧॥

વૃદ્ધાશ્ચ યે ગ્રહાઃ કેચિદ્યે ચ બાલગ્રહાઃ ક્વચિત્ ।
નરસિંહસ્ય તે દૃષ્ટ્યા દગ્ધા યે ચાપિ યૌવને ॥ ૩૨॥

સદા કરાલવદનો નરસિંહો મહાબલઃ ।
ગ્રહાનશેષાન્નિઃશેષાન્ કરોતુ જગતો હિતઃ ॥ ૩૩॥

નરસિંહ મહાસિંહ જ્વાલામાલોજ્જ્વલાનન ।
ગ્રહાનશેષાન્ સર્વેશ ખાદ ખાદાગ્નિલોચન ॥ ૩૪॥

યે રોગા યે મહોત્પાતા યદ્વિષં યે મહાગ્રહાઃ ।
યાનિ ચ ક્રૂરભૂતાનિ ગ્રહપીડાશ્ચ દારુણાઃ ॥ ૩૫॥

શસ્ત્રક્ષતેષુ યે દોષા જ્વાલાગર્દભકાદયઃ ।
તાનિ સર્વાણિ સર્વાત્મા પરમાત્મા જનાર્દ્દનઃ ॥ ૩૬॥

કિઞ્ચિદ્રૂપં સમાસ્થાય વાસુદેવાસ્ય નાશય ।
ક્ષિપ્ત્વા સૂદર્શનઞ્ચક્રં જ્વાલામાલાતિભીષણમ્ ॥ ૩૭॥

સર્વદુષ્ટોપશમનં કુરુ દેવવરાચ્યુત ।

સુદર્શન મહાજ્વાલ છિન્ધિ છિન્ધિ મહારવ ॥ ૩૮॥

સર્વદુષ્ટાનિ રક્ષાંસિ ક્ષયં યાન્તુ વિભીષણ ।
પ્રાચ્યાં પ્રતીચ્યાં ચ દિશિ દક્ષિણોત્તરતસ્તથા ॥ ૩૯॥

રક્ષાઙ્કુરોતુ સર્વાત્મા નરસિંહઃ સુગર્જ્જિતઃ ।
દિવિ ભુવ્યન્તરીક્ષે ચ પૃષ્ઠતઃ પાર્શ્વતોઽગ્રતઃ ॥ ૪૦॥

રક્ષાઙ્કુરોત્ ભગવાન્ બહુરૂપી જનાર્દ્દનઃ ।
યથા વિષ્ણુર્જ્જગત્સર્વં સદેવાસુરમાનુષમ્ ॥ ૪૧॥

તેન સત્યેન દુષ્ટાનિ સમમસ્ય વ્રજન્તુ વૈ ।
યથા વિષ્ણૌ સ્મૃતે સદ્યઃ સઙ્ક્ષયં યાન્તિ પાતકાઃ ॥ ૪૨॥

સત્યેન તેન સકલં દુષ્ટમસ્ય પ્રશામ્યતુ ।
યથા યજ્ઞેશ્વરો વિષ્ણુર્દ્દેવેષ્વપિ હિ ગીયતે ॥ ૪૩॥

તેન સત્યેન સકલં દુષ્ટમસ્ય પ્રશામ્યતુ ।
શાન્તિરસ્તુ શિવઞ્ચાસ્તુ દુષ્ટમસ્ય પ્રશામ્યતુ ॥ ૪૪॥

વાસુદેવશરીરોત્થૈઃ કુશૈર્ન્નિર્મ્મથિતં મયા ।
અપમાર્જતિ ગોવિન્દો નરો નારાયણસ્તથા ॥ ૪૫॥

તથાસ્તુ સર્વદુખાનાં પ્રશમો વચનાદ્ધરેઃ ।
અપમાર્જનકં શસ્ત્રં સર્વરોગાદિવારણમ્ ॥ ૪૬॥

અહં હરિઃ કુશા વિષ્ણુર્હતા રોગા મયા તવ ॥ ૪૭॥

ઇત્યાદિમહાપુરાણે આગ્નેયે કુશાપમાર્જનં નામ એકત્રિંશોઽધ્યાયઃ ।

અગ્નિપુરાણ । અધ્યાય ૩૧/૨-૪૬॥

agnipurANa . adhyAya 31/2-46..

Proofread by PSA Easwaran

---

*Kushapamarjana Stotram*

pdf was typeset on October 2, 2024

Please send corrections to *sanskrit@cheerful.com*